दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढकृष्णामावस्या
आषाढः 30 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-262 | 1 | जुलाई 14, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 मुम्बई-नगरे भारतीयरिज़र्वबैङ्क-द्वारा तृतीयस्य आन्तरिक-ओम्बड्समैन (लोकपाल) वार्षिकसम्मेलनस्य आयोजनम्

3 युवाकाङ्ग्रेसस्य जिलाध्यक्षेभ्यः सङ्घटनेन सह सर्वकारे अपि प्रदास्यते उत्तरदायित्वम् - मुख्यमन्त्री सुक्खूः

6 'बिहारराज्यस्य कृषकेभ्यः प्राप्स्यते आधुनिक-विपण-तन्त्रम्, वर्धिष्यते मूल्य-संवर्धनं प्रसंस्करणं च'

## न्यूज़ीलैंड-देशस्य

### ग्रामीणसमुदायमन्त्रिणः मार्क पैटरसन महोदयस्य लोकसभाध्यक्षेण ओम बिरला वर्येण सह सम्मेलनम्



न्यूज़ीलैंड-देशस्य ग्रामीणसमुदाय-मन्त्रिणः मार्क पैटरसन महोदयस्य नेतृत्वे एकेन प्रतिनिधिमण्डलेन गतदिने नवदेहाल्यां संसदभवने लोकसभाध्यक्षः ओम बिरला महोदयः अमिलत्। सामाजिकमाध्यमस्य (सोशल मीडिया) एकां प्रविष्टिं (पोस्ट) अनुसृत्य श्री बिरला महोदयेन उक्तं यत् अस्मिन् सम्मेलने संसदीय-आदानप्रदानस्य सुदृढीकरणाय तथा च भारत-न्यूज़ीलैंडदेशयोः मध्ये दीर्घकालात् प्रचलन्तः सम्बन्धाः अधिकाः गाढाः कर्तुं महत्त्वं दत्तम्। तेन उक्तं यत् संसदभवनस्य भ्रमणकाले प्रतिनिधिमण्डलाय भारतस्य जीवन्तः संसदीयलोकतन्त्रस्य, समृद्धलोकतान्त्रिकपरम्पराणाम्, स्थापत्यकलायाः च भव्यतायाः परिचयः कारितः।

## भारत-जापानयोः मुक्त-उन्मुक्त-नियमबद्ध-हिन्द-प्रशान्तक्षेत्रं प्रति स्वप्रतिबद्धतायाः पुनरुक्तिः




हिमसंस्कृतवार्ता। भारत-जापानदेशाभ्यां मुक्तस्य, उन्मुक्तस्य, नियमबद्धस्य च हिन्द-प्रशान्तक्षेत्रस्य कृते स्वकीया प्रतिबद्धता पुनरुक्ता। जापानदेशस्य टोक्यो-नगरे गतदिने भारत-जापान-रक्षा-नीति-वार्तायाः अष्टमे चरणे उभौ देशौ क्षेत्रीय-वैश्विक-सुरक्षा-स्थितेः विषये व्यापकं चर्चाम् अकुरुताम्।उभयपक्षतः परस्परहितस्य विषयेष्वपि विचारविमर्शः कृतः। भारतीयप्रतिनिधिमण्डलस्य नेतृत्वं रक्षासचिवः राजेशकुमारसिंहः अकरोत्। जापानपक्षतः अन्तरराष्ट्रीयप्रकरणानां रक्षा-उपमन्त्री कानो कोजी महोदयः प्रतिनिधिमण्डलस्य नेतृत्वं कृतवान्। अस्यां वार्तायाम् विगतवैठकस्य अनन्तरं रक्षासहयोगे संजातायाः प्रगतेः समीक्षा कृता। उभौ देशौ रक्षाउद्योग-नूतनप्रौद्योगिकी-साइबरसुरक्षा-अन्तरिक्ष-अन्य-उदीयमानक्षेत्रेषु सहयोगं वर्धयितुम् अपि चर्चाम् अकुरुताम्।अस्मिन् उपवेशने सैन्य-आदानप्रदानस्य, संयुक्तमुख्यालयानां मध्ये सहयोगस्य, समुद्रीसहयोगस्य, रक्षाभ्यासस्य, क्षमतानिर्माणस्य, रक्षा-उपकरणानां प्रौद्योगिकीनां च (विशेषतः समुद्रीप्रौद्योगिक्याः) तथा संस्थागतसहयोगस्य अपि समीक्षा कृता। उभौ पक्षौ रक्षासहयोगस्य निरन्तरविस्तारस्य स्वागतं कृतवन्तौ।रक्षासचिवः राजेशकुमारसिंहः भारतस्य रक्षाक्षेत्रे जापानस्य सहयोगं प्रशंसितवान्। सः भारत-जापान-विशेष-सामरिक-वैश्विक-सहभागितायाः अन्तर्गतं व्यावहारिकसहयोगं वर्धयितुं बलं दत्तवान्। इतः पूर्वं, रक्षासचिवः जापानस्य रक्षामन्त्रिणा शिंजिरो कोइज़ुमी महोदयेन सह अमिलत्। सः भारतस्य रक्षामन्त्रिणः राजनाथसिंहस्य पक्षतः शुभकामनाः प्रापितवान्। अन्ततः उभौ पक्षौ भारत-जापान-विशेष-सामरिक-वैश्विक-सहभागितां अधिकं सुदृढां कर्तुं सहमतिं प्रकटितवन्तौ।

## सुभाषितम्

**सुखमापतितं सेव्यं,**
**दुःखमापतितं तथा।**
**चक्रवत् परिवर्तन्ते,**
**दुःखानि च सुखानि च॥**
**(हितोपदेश, मित्रलाभ- १७७)**

अर्थात्- आए हुए सुख तथा दुःख को भोगना चाहिए, क्योंकि सुख और दुःख पहिए की तरह घूमते हैं अर्थात् सुख के बाद दुःख और दुःख के बाद सुख आते जाते हैं।






## देहली-सर्वकारस्य 'महिला समृद्धि योजना' इत्यस्याः नाम परिवर्तनं कृत्वा 'देहली लक्ष्मी योजना' इति विहितम्



देहली-सर्वकारेण स्वकीया प्रमुखा 'महिला समृद्धि योजना' शासकीयरीत्या विहाय 'देहली लक्ष्मी योजना' इति नामकरणं कृतम्। अस्याः योजनायाः प्रभावशालि-समयबद्ध-कार्यान्वयनं सुनिश्चितं कर्तुं मुख्यमन्त्री रेखा गुप्ता गतेऽहनि देहली-सचिवालये उच्चस्तरीय-समीक्षा-गोष्ठीम् आहूतवती। अस्याः योजनायाः अन्तर्गतं २१ वर्षतः ६० वर्षपर्यन्तं वयःसीमातः पात्राभ्यः महिलाभ्यः प्रतिमासं २५०० रूप्यकाणां वित्तीय-अनुदानं प्रदास्यते।

## लखनऊ-नगरे 'एकः राष्ट्रः, एकं निर्वाचनम्' इति विषये संयुक्तसंसदीयसमित्या विचारविमर्शः




'एकः राष्ट्रः, एकं निर्वाचनम्' इति प्रस्तावितप्रारूपस्य समीक्षां कुर्वती संयुक्तसंसदीयसमितिः गतसोमवासरे उत्तरप्रदेशस्य लखनऊ-नगरे विशेषज्ञैः हितधारकैः च सह चर्चाम् अकरोत्। देशव्यापि-परामर्शप्रक्रियायाः अन्तर्गतं समितिः उत्तरप्रदेशस्य द्विदवसीयभ्रमणाय आगता अस्ति।समित्याः सदस्यः, भारतीयजनतापार्टीदलस्य लोकसभासांसदः च अनुरागठाकुरः न्यवेदयत् यत् समित्या राज्यसर्वकारस्य वरिष्ठप्रशसकीयअधिकारिभिः, मुख्यनिर्वाचनधिकारिणा, बैंकिङ्गक्षेत्रस्य प्रतिनिधिभिः, विधिविशेषज्ञैः च सह प्रस्तावित-निर्वाचनसुधारे तेषां विचाराः ज्ञाताः।चर्चाप्रसङ्गे श्रीठाकुरः उक्तवान् यत् सहसा (एकस्मिन्नेव समये) निर्वाचनेन संशाधनानां महती रक्षणं भविष्यति तथा च आदर्श-आचारसंहितायाः असकृत् (बार-बार) प्रवर्तनेन जायमाना नीत्यवरोधाः न्यूनाः भविष्यन्ति। अनेन शासने निरन्तरता अपि सुनिश्चिता भविष्यति।समितिः अद्य राजनैतिकदलानां प्रतिनिधिभिः अन्यराजनैतिकदलैः च सह मिलित्वा देशव्यापी-सहसा-निर्वाचनस्य प्रस्तावे तेषां मतान्यपि ज्ञास्यति।एते परामर्शाः 'एकः राष्ट्रः, एकं निर्वाचनम्' इति उपक्रमे स्वकीयाः अनुशंसाः अन्तिमरूपं दातुं प्राक् समाजस्य विभिन्नेभ्यः वर्गेभ्यः सुझाव-प्रतिक्रियाणाम् सङ्ग्रहणाय क्रियन्ते।

## अस्मिन् वर्षे अप्रैल-जूनमासयोः मध्ये भारतस्य कुलनिर्याते ११.३७ प्रतिशतं वृद्धिः




अस्मिन् वर्षे अप्रैलमासात् जूनमासस्य मध्ये भारतस्य कुलनिर्यातः २३२ अरब (शङ्कु) अमरीकीडॉलर-परिमितः भवितुम् अनुमानितः अस्ति। अस्मिन् अवसरे गतवर्षस्य एतस्याः एव अवधेः तुलनायां निर्याते ११.३७ प्रतिशतं वृद्धिः अङ्किता। वाणिज्य-उद्योगमन्त्रालयेन उक्तं यत् अस्मिन् वर्षे जूनमासे कुलनिर्यातः ७३ अरब ४५ करोड़ अमरीकीडॉलर-परिमितः भवितुम् आकलनं कृतम् अस्ति २पृष्ठे

# मुम्बई-नगरे भारतीयरिज़र्वबैङ्क-द्वारा तृतीयस्य आन्तरिक-ओम्बड्समैन (लोकपाल) वार्षिकसम्मेलनस्य आयोजनम्





भारतीयरिज़र्वबैङ्केन गतदिने मुम्बई-नगरे आन्तरिक-ओम्बड्समैन (लोकपाल) महोदयानां तृतीयं वार्षिकं सम्मेलनम् आयोजितम्। अस्मिन् सम्मेलने बैङ्कानां, गैर-बैङ्किङ्ग-वित्तीयकम्पनीनां, क्रेडिट-सूचनाकम्पनीनां तथा च रिज़र्वबैङ्कस्य लोकपालानां प्रतिनिधिभिः भागः गृहीतः।सम्मेलनं सम्बोधयन् भारतीयरिज़र्वबैङ्कस्य उप-गवर्नरः स्वामीनाथन जे. महोदयः अधिकारिणः आदिष्टवान् यत् ग्राहकाणां समस्यानां (शिकायतानां) सार्थकं, निष्पक्षं, प्रभावी च समाधानं सुनिश्चियम् करणीयम्। तेन सह, असकृत् (बार-बार) सम्मुखीभवन्तीनां समस्यानां पहिचानं कृत्वा तासाम् मूलकारणानां विश्लेषणं भवेत् तथा च सुधारात्मकाः उपायाः प्रवर्तनीयाः।

# वित्तमन्त्रिणः निर्मलासीतारमणमहोदयायाः सार्वजनिकक्षेत्रस्य बैङ्केभ्यः अनिवासीभारतीयान् (एनआरआई) प्रति सम्पर्कविस्ताराय निर्देशः



वित्तमन्त्री निर्मला सीतारमण महोदया सार्वजनिकक्षेत्रस्य बैङ्कान् अनिवासी-भारतीयान् (एनआरआई) प्रति स्वकीयं सम्पर्कं वर्धयितुं तथा च नूतनान् निक्षेप-उत्पादान् (जमा उत्पाद) आरब्धुम् उक्तवती। नवदेहाल्यां बैङ्कानां सार्वजनिकवित्तीय-संस्थानां च प्रबन्धनिदेशकैः मुख्यकार्यकारिअधिकारिभिः (सीईओ) च सह संवादे सा धनसञ्चयस्य (कोषसङ्ग्रहस्य) गतिं निरन्तरं कर्तुम् अनिवासीभारतीयान् प्रति सम्पर्कवर्धनस्य विषये अपि बलं दत्तवती।अस्मिन् अवसरे, बैङ्कानां सार्वजनिकवित्तीयसंस्थानां च प्रबन्धनिदेशकाः मुख्यकार्यकार्यधिकारिणः च वित्तमन्त्रिणीं भारतीय-रिज़र्व-बैङ्कस्य (आरबीआई) 'स्वैप-सुविधा-योजनानाम्' अन्तर्गतं संजातायाः प्रगतेः विषये ज्ञापितवन्तः। बैङ्कानां सार्वजनिकवित्तीय-संस्थानां च एषा सहभागिता वैदेशिकमुद्राप्रवाहस्य सङ्ग्रहणाय स्वैप-सुविधानां प्रभावशीलतां प्रतिपादयति। एतेषां सहभागिता देशस्य वैदेशिकमुद्राभण्डारम् अपि सुदृढं करोति तथा च वैश्विक-अनिश्चिततायाः मध्ये देशं शक्तिशालिनं करोति।

# सामाजिकन्याय-अधिकारितामन्त्रालयेन अद्य तृतीयस्य 'नमस्ते दिवसस्य' आयोजनम्




सामाजिकन्याय-अधिकारितामन्त्रालयः अद्य तृतीयं 'नमस्ते दिवसम्' आयोजयिष्यति। एषः दिवसः यन्त्रीकृत-स्वच्छता-पारिस्थितिकीतन्त्राय राष्ट्रियकार्यान्वयनस्य अर्थात् 'नमस्ते योजनायाः' आरम्भस्य वर्षत्रयपूर्तेः प्रतीकः अस्ति। मन्त्रालयेन ज्ञापितं यत् मुख्यः कार्यक्रमः कोलकाता-नगरस्य 'रवीन्द्र सदन' इत्यत्र 'दिव्य कला मेलेन' सह आयोजितः भविष्यति। एतस्य समानान्तराः कार्यक्रमाः देशव्यापी-शहरी-स्थानीय-निकायान् (ULBs) आरभ्य आयोजयिष्यन्ते।मन्त्रालयेन उक्तं यत् 'नमस्ते दिवसः' जनस्वास्थ्यस्य पर्यावरणस्वच्छतायाः च रक्षणे सफाईकर्मकराणाम् (स्वच्छतादूतानाम्) महत्त्वपूर्णभूमिकायाः आदरं कर्तुं समर्पितः अस्ति। एतेषु मलयुक्त-नलिकानां (सीवर) सेप्टिक-टैङ्क-इत्यादीनां कर्मकराः, अवकरसङ्ग्राहकाः (कचरा बीनने वाले), मार्जकाः च समाविष्टाः सन्ति। अस्मिन् कार्यक्रमे सामाजिकन्याय-अधिकारितामन्त्री वीरेन्द्रकुमारः तथा च राज्यमन्त्री रामदास अठावले महोदयः उपस्थितौ भवितुं सम्भाव्येते।

**भारतस्य निर्यातः...** एतेषाम् अङ्कानाम् आधारेण गतवर्षस्य अस्य मासस्य तुलनायां निर्याते ९.४८ प्रतिशतं वृद्धिः अङ्किता।जूनमासे वस्तूनां निर्याते तीव्रता मुख्यरूपेण वज्र-मणीनां (हीरे और जवाहरात), आभियान्त्रिकी-सामग्रीणां (इंजीनियरिंग सामान), जैविक-अजैविक-रसायनानां, वैद्युतिक-वस्तूनां (इलेक्ट्रॉनिक सामान), तण्डुलस्य च क्षेत्रे दृष्टा। वैद्युतिक-वस्तूनां निर्यातः गतवर्षस्य जूनमासे चतुररब १४ करोड़ अमरीकीडॉलर-तः प्रवर्ध्य अस्मिन् वर्षे जूनमासे चतुररब ९३ करोड़ अमरीकीडॉलर-परिमितः अभवत्, एवं प्रकारेण प्रायः १९ प्रतिशतं वृद्धिः अङ्किता। मन्त्रालयानुसारम् अस्मिन् वर्षे जूनमासे वस्तूनां सेवानां च कुलायातः ८८ अरब ७६ करोड़ अमरीकीडॉलर-परिमितः भवितुम् अनुमानः अस्ति, यत् गतवर्षस्य अस्यैव अवधेः तुलनायां २६ प्रतिशतं अधिकम् अस्ति।

# एनटीए इत्यनेन NEET (UG)-2026 इत्यस्य कृते स्कैन् कृतानि OMR उत्तरपत्राणि प्रकाशितानि




राष्ट्रीयपरीक्षणसंस्थया (NTA) राष्ट्रियपात्रता सह प्रवेशपरीक्षायाः (NEET UG-2026) उत्तरपत्राणि विमोचिताः सन्ति तथा च उत्तराणि अभिलेखितानि सन्ति। परीक्षायाः कृते उपस्थिताः अभ्यर्थिनः अधुना स्वस्य परिणामं द्रष्टुं शक्नुवन्ति, यदि ते असन्तुष्टाः सन्ति तर्हि ऑनलाइन-आपत्तिं कर्तुं शक्नुवन्ति।

## OMR पत्रं कुत्र द्रष्टव्यम् ?

एनटीए इत्यनेन ओएमआर उत्तरपत्राणां स्कैन् कृतानि चित्राणि अपलोड् कृत्वा NEET (UG)-2026 इत्यस्य प्रतिक्रियाः आधिकारिकजालस्थले https://neet.nta.nic.in/ इत्यत्र अभिलेखितानि सन्ति। अपि च, अभ्यर्थीनां सुविधायै पञ्जीकरणसमये अभ्यर्थिभिः प्रदत्तपञ्जीकृते ईमेल-सङ्केते ओएमआर-पत्रस्य स्कैन्-कृता प्रतिलिपिः अपि प्रेषिता अस्ति ।

# मण्डी-लोकसभाक्षेत्रस्य सासंद् कंगना रनौत 'बिजली महादेव' मन्दिरं प्राप्ता; कठिनां पदयात्रां कृत्वा कृतवती भगवतः शिवस्य दर्शनम्



हिमसंस्कृतवार्ताः कुल्लू। चलच्चित्रजगतः प्रसिद्धा अभिनेत्री, मण्डी- लोकसभाक्षेत्रस्य सासंद च कंगना रनौत स्वसंसदीयक्षेत्रस्य प्रवासकाले पुनः एकवारं आध्यात्मिकमुद्रायां दृष्टा। रविवासरे सा कुल्लू-मण्डलस्य खराहल-घाटीक्षेत्रस्य उच्चपर्वतशिखरेषु स्थितं प्रसिद्धं 'श्री बिजली महादेव' मन्दिरं प्रति कठिनपदमार्गेण यात्रां कृत्वा भगवतः शिवस्य दिव्यदर्शनं कृतवती। प्रायशः सार्धैकहोरात्मकं (१.५ घण्टा) पर्वतारोहणं समाप्य सा मन्दिरे विधिवत् पूजा-अर्चनां चकार, कञ्चित् कालं यावत् च ध्याने मग्ना भूत्वा आध्यात्मिकशान्तेः अनुभूतिमकरोत्।

## असीमा शान्तिः, सकारात्मक-ऊर्जायाः च अनुभूतिः

दर्शनोत्तरं कंगना रनौत स्वकीययात्रायाः छायाचित्राणि सामाजिकमाध्यमेषु प्रसार्य अलिखत् यत्, दुर्गमेण पर्वतमार्गेण मन्दिरं प्राप्य महादेवस्य दर्शनेन सा असीमा शान्तिं सकारातमोर्जां च अनुभूतवती। तस्याः एतां प्रविष्टिं सामाजिक- माध्यमेषु बहुभिः जनैः श्लाघ्यते, छायाचित्राणि च तीव्रगत्या सर्वत्र प्रसारितानि भवन्ति।

## स्थानीयपरम्पराभिः संस्कृत्या च सह सम्बन्धः-

अस्यां धार्मिकयात्रायां कंगना पारम्परिकं हिमाचलीटोपिकां सादगीपूर्णं परिधानं च धृतवती दृश्यते स्म। तया सह तस्याः परिवारस्य सदस्याः, सहयोगिनः, सुरक्षाकर्मिणः च उपस्थिताः आसन्। मन्दिरप्राङ्गणे स्थानीयजनैः तस्याः सोत्साहं स्वागतं कृतम्। अस्मिन् अन्तरे सा श्रद्धालुभिः ग्रामिणैः च सह वार्तालापं कृत्वा क्षेत्रस्य धार्मिकपरम्पराणां स्थानीयसंस्कृतेः च विषये सविस्तरं ज्ञानं प्राप्तवती।ग्रामीणैः सह संवादः, विकासकार्याणां च चर्चा मन्दिरदर्शनात् परं कंगना खराहल-घाटीक्षेत्रस्य महिलाभिः साकं मिलितवती, ग्रामसम्बद्धेषु विविधविषयेषु च चर्चां कृतवती। ग्रामीणमहिलाभिः सा क्षेत्रस्य स्थानीयसमस्याभिः विकाससम्बद्ध-विषयेभ्यः च अवगतं कारिता। सासंद् महोदया तासां वचांसि ध्यानपूर्वकं श्रुतवती, क्षेत्रस्य समुचितविकासाय निरन्तरं प्रयासं कर्तुं च विश्वासं दत्तवती।

## पारम्परिकव्यञ्जनानां रसास्वादनं, हिमाचलं प्रति च अगाधप्रेम

यात्राकाले कंगना ग्रामीणैः सह उपविश्य हिमाचलस्य प्रसिद्धस्य पारम्परिकव्यञ्जनस्य 'सिड्डू' इत्यस्य रसास्वादनं कृतवती। सा अवदत् यत् हिमाचलस्य समृद्धा संस्कृतिः, लोकपरम्पराः, अत्रत्यानां जनानां च आत्मीयता सर्वदा तां प्रति आकर्षयति। स्थानीयभोजनस्य स्वादुत्वं जनानां च स्नेहः तस्याः कृते एकः विशिष्टः सुखदानुभवः आसीत्।

## क्षेत्रे विकासकार्याणां शुभारम्भः, जनसामान्येन सह च संवादः

उल्लेखनीयमस्ति यत् इतः पूर्वमपि कंगना रनौत स्वकीय-कुल्लू-प्रवासकाले खराहल-घाटीक्षेत्रस्य 'चंसारी' नामके स्थाने निःशुल्क-चल- चिकित्सावाहनसेवा आरब्धवती आसीत्। स्थानीयजनानां विश्वासः अस्ति यत् सासंद- महोदयायाः निरन्तर-क्षेत्रीयप्रवासैः जनसामान्येन सह संवादः वर्धते, धार्मिकपर्यटनेन च सह स्थानीयसंस्कृतिः अपि नूतनगौरवं प्राप्नोति। कुल्लू- प्रवासकाले तस्याः बिजली महादेव मन्दिरं प्रति गमनं श्रद्धालुनां स्थानीयजनानां च मध्ये महतः कौतूहलस्य चर्चायाः च विषयः सञ्जातः।

# युवाकाङ्ग्रेसस्य जिलाध्यक्षेभ्यः सङ्घटनेन सह सर्वकारे अपि प्रदास्यते उत्तरदायित्वम् - मुख्यमन्त्री सुक्खूः




**हिमसंस्कृतवार्ताः — शिमला ।** मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खू महोदयेन प्रतिपादितं यत् जिला-युवाकाङ्ग्रेसस्य अध्यक्षेभ्यः सङ्घटनेन साकं सर्वकारे अपि उचितं दायित्वं प्रदास्यते। सः सोमवासरे काङ्ग्रेसमुख्यालये 'राजीवभवनम्' इत्यस्मिन् एन.एस.यू.आई. (NSUI) इत्यस्य सङ्घटनात्मक-आन्तरिक-निर्वाचनकार्यक्रमं युवाकाङ्ग्रेसस्य राष्ट्रव्यापी-अभियानं छात्राणां गुञ्जनम् ( 'छात्रों की गूंज') इत्येव सम्बोधयन् आसीत्। तेन प्रोक्तं यत् सर्वे जिलाध्यक्षाः अभियोग-निवारण-समितौ अथवा अन्यासु उपयुक्तासु समितिषु समाविष्टाः करिष्यन्ते। सर्वान् अपि जनपदेषु निगमेषु च निदेशकं विधातुं न शक्यते, परन्तु यत्र कुत्रापि अवसरः भविष्यति, तत्र जिलाध्यक्षेभ्यः पक्षस्य (पार्टी) कार्यकर्तृभ्यश्च प्राधान्यं प्रदास्यते। अस्मात् पूर्वं युवाकाङ्ग्रेसस्य प्रदेशाध्यक्षेण छतरसिंहठाकुरेण अन्यैश्च एन.एस.यू.आई. कार्यकर्तृणां कृते सर्वकारे स्थानं दातुं याचना उत्थापिता आसीत्।

## धर्मः आस्था च कस्यापि

### राजनैतिकदलस्य पैतृक-सम्पत्तिः नास्ति

मुख्यमन्त्रिणा कथितं यत् वयं प्रतिदिनं पूजां कुर्मः। धेनोः (गाय) पूजां कुर्मः, कन्यापूजनं कुर्मः। अस्मात् महान् सनातनी कः भवितुं शक्नोति? भाजपा-जनाः सनातनी भवितुं प्रमाणपत्रं (सर्टिफिकेट) वितरन्तः भ्रमन्ति। तेन प्रतिपादितं यत् धर्मः आस्था च कस्यापि राजनैतिकदलस्य पैतृकसम्पत्तिः (बपौती) नास्ति। साकमेव तेन उक्तं यत् तस्य सर्वकारः प्रदेशे ४० वर्षपुरातनीं व्यवस्थां संपरिवर्त्य पारदर्शि-उत्तरदायित्व-प्रशासनस्य स्थापनायै दिशि कार्यं करोति। मुख्यमंत्री सुक्खू महोदयेन प्रोक्तं यत् आगामिकाले हिमाचले इतिहासः परिवर्तिष्यते। तेन कथितं यत् प्रदेशकाङ्ग्रेससमित्याः अध्यक्षा डॉ. वाई.एस. परमारस्य पत्नी आसीत् या षड्वर्षाणि दिनद्वयं च यावत् पदे अतिष्ठत्, स च (सुक्खू) षड्वर्षाणि दिनत्रयं च अतिष्ठत्। कस्मिन्नपि पदे सः सुदीर्घकालं यावत् स्थितवान् अस्ति।

### अग्निवीरयोजनायाः उपरि कृतं वाक्प्रहारम्

मुख्यमन्त्रिणा प्रतिपादितं यत् जनसङ्ख्यायाः अनुपाते प्रदेशस्य सैनिकैः देशाय सर्वाधिकानि वीरतापदकानि प्राप्तानि अनेके च युवानः सर्वोच्चं बलिदानं दत्तवन्तः। तेन केन्द्रसर्वकारस्य 'अग्निवीर' योजनायाः उपरि प्रहारं कुर्वता कथितं यत् पूर्वं हिमाचलस्य युवानः महत्या सङ्ख्यया सेनायां नियुक्ताः भवन्ति स्म, परन्तु अधुना नियुक्त्यवसराः न्यूनाः अभवन्। एतादृश्याम् स्थितौ राज्यसर्वकारेण युवकेभ्यः जीविकाप्रदानाय आरक्षिबलम् (पुलिस) सम्मिलितं कृत्य विविधेषु विभागेषु निरन्तरं नियुक्तयः आरब्धाः सन्ति। मुख्यमन्त्रिणा सुक्खू महोदयेन प्रोक्तं यत् काङ्ग्रेससर्वकारस्य सङ्घटनात् सद्यः परमेव 'पेपर लीक' (प्रश्नपत्र-प्रकटन) प्रकरणानां विरुद्धं दृढा कार्यविधिः कृता। युवकानां भविष्येण सह क्रीडन्तः केऽपि न मुक्ताः। अधीनस्थ-सेवा-चयन-बोर्ड (Subordinate Services Selection Board) इत्यस्य भङ्गं विहितं प्रकरणे संलिप्ताः जनाश्च कारागारं प्रेषिताः। तेन 'नीट' (NEET) प्रश्नपत्र-प्रकटनस्य उल्लेखं कृत्वा केन्द्रसर्वकारस्य अपि आलोचना कृता। तेन कथितं यत् शिक्षाक्षेत्रे हिमाचलम् अद्य देशे गुणवत्ताधारेण पञ्चमे स्थाने वर्तते सर्वकारश्च एतत् इतोऽपि श्रेष्ठं विधातुं प्रयतते। स्वास्थ्यसेवाः सुदृढाः कर्तुं 'एम्स' (AIIMS) नवदेहली-स्तरस्य आधुनिकानि यन्त्राणि सर्वकारीयचिकित्सालयेषु उपलब्धं क्रियन्ते। प्रदेशस्य चतुर्षु आयुर्विज्ञानमहाविद्यालयेषु (मेडिकल कालेजेषु) रोबोटिक-शल्यक्रियायाः (रोबोटिक सर्जरी) सौकर्यमपि आरब्धम् अस्ति।

## मुख्यमन्त्री भविष्यामि इति कदापि न चिन्तितवान्

अस्मिन् अवसरे राष्ट्रिय-युवाकाङ्ग्रेसस्य सचिवः हिमाचलप्रभारी च ज्योतिष एच.एम., विधायकः केवलसिंहपठानिया इत्यादयः अनेके गण्याः मान्याः च उपस्थिताः आसन्। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खू महोदयेन कार्यकर्तारः कथिताः यत् तेन कदापि न चिन्तितं यत् सः हिमाचलप्रदेशस्य मुख्यमन्त्री भविष्यति। तेन प्रोक्तं— "अहमपि भवन्तः इव सामान्यपरिवारात् अस्मि। सङ्घटनेन मह्यम् अग्रे सरितुम् अवसरः प्रदत्तः अद्य च अहम् अस्य दायित्वस्य निर्वहणं करोमि।"

# सप्तजनपदानां सी.बी.एस.ई. विद्यालयेषु ६२ प्रधानाचार्याणां नियुक्तिः, वरीयता-आधारेण अभवत् चयनम्



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशसर्वकारेण राज्यस्य सीबीएसई- सम्बद्धविद्यालयेषु 'स्कूल ऑफ एक्सीलेंस' (उत्कृष्टविद्यालय) परियोजनां वेगीकर्तुं महता स्तरेण प्रधानाचार्याणां नियुक्ति- स्थानान्तरणादेशाः प्रसारिताः। शिक्षाविभागेन कृतायाः अधिसूचनायाः अन्तर्गतं विविधेषु मण्डलेषु कार्यं कुर्वन्तः ६२ प्रधानाचार्याः (विद्यालयवर्गः) सीबीएसई- सम्बद्ध- पीएमश्री, आदर्शः, उत्कृष्ट- वरिष्ठ-माध्यमिक- विद्यालयेषु नूतनदायित्वानि प्राप्नुवन्। शिक्षाविभागस्य आदेशानुसारं सर्वाधिक नियुक्तयः शिमलामण्डले कृताः, यत्र २१ प्रधानाचार्याः विविधेषु पीएमश्री, आदर्श- उत्कृष्टविद्यालयेषु नियुक्ताः सन्ति। एतदतिरिच्य मण्ड्यां १७, चम्बायां ८, सिरमौरे ७, कुल्लौ ४, किन्नौरे ४, लाहौल-स्पीतौ च एकः प्रधानाचार्यः नियुक्तः जातः। अधिसूचनायां स्पष्टीकृतं यत् येषु विद्यालयेषु नूतनानां प्रधानाचार्याणां नियुक्तिः अभवत्, तत्र पूर्वं कार्यरताः अधिकारिणः आगामी-आदेशं यावत् सम्बद्ध- मण्डल-उपनिदेशक- कार्यालये स्वसेवाः प्रदास्यन्ति। साकमेव सीबीएसई-सम्बद्धविद्यालयेषु एताः नियुक्तयः स्थानान्तरणानि च 'स्कीम फॉर सीबीएसई एफिलिएटेड स्कूल्स ऑफ एक्सीलेंस इन हिमाचल प्रदेश' इत्यस्य प्रावधानैः सञ्चालिताः भविष्यन्ति। शिक्षाविभागेन सर्वान् अधिकारिणः निर्दिष्टाः यत् ते सद्यः प्रभावेण स्वकीये नूतनकार्यस्थले कार्यभारं गृह्णीयुः, उपस्थिति- सूचनां च निर्धारितमाध्यमेन विभागं प्रति प्रेषयेयुः। एते आदेशाः शिक्षासचिवेन राकेश कंवरेण प्रसारिताः सन्ति।

# चिकित्सामहाविद्यालयेभ्यः

## 'हिमकेयर'योजनान्तर्गतं ५० कोटिरूप्यकाणि मुक्तानि, रोगिणः समये प्राप्स्यन्ति चिकित्सालाभम्

हिमसंस्कृतवार्ताः शिमला। हिमाचलसर्वकारेण राज्यस्य शासकीयचिकित्सामहाविद्यालयेभ्यः 'हिमकेयर'योजनान्तर्गतं ५० कोटिरूप्यकाणां (५० कोटिः) राशिः मुक्ता। एषः निधिः चिकित्सा- महाविद्यालयेषु हिमकेयर-लाभार्थिनां चिकित्सायां शस्त्रक्रियासु (ऑपरेशन) च संजातस्य व्ययस्य भरणाय उपलब्धः कारितः। सर्वकारस्य अनेन निर्णयेन लम्बितदायित्वानां भारः न्यूनः भविष्यति, रोगिणः च समये चिकित्सालाभं प्राप्तुं शक्ष्यन्ति। चिकित्सालयप्रबन्धनेन सर्वकारं प्रति धनराशेः मुक्त्यै प्रार्थना कृता आसीत्। शासकीय-चिकित्सा- महाविद्यालयेषु महत्यां संख्यायां हिमकेयरयोजनायाः अन्तर्गतं रोगिणां चिकित्सा जटिलाः शस्त्रक्रियाः च क्रियन्ते। विगते कश्चित्कालात् भुक्तौ विलम्बकारणात् चिकित्सा-महाविद्यालयेषु वित्तीयमर्दनं (वित्तीयदबावः) वर्धितम् आसीत्। सर्वकारस्य उद्देश्यं वर्तते यत् हिमकेयरयोजनायाः लाभार्थिनः विना कमपि आर्थिकक्लेशं श्रेष्ठस्वास्थ्यसेवाः प्राप्नुयुः। समये भुक्तौ सत्यां चिकित्सामहाविद्यालयेषु रोगिणां चिकित्साप्रक्रिया अपि प्रभाविता न भविष्यति, आवश्यकतावन्तः जनाः च पूर्ववत् नकदविहीनां (कैशलेस) चिकित्सां प्राप्स्यन्ति। स्वास्थ्यमन्त्री धनीरामशाण्डिलः अवदत् यत् सर्वेभ्यः शासकीय- चिकित्सा- महाविद्यालयेभ्यः आवश्यकतानां लम्बितेहाधिकारणां च आधारेण एषा राशिः प्रदीयते। स्वास्थ्यविभागः इदानीं हिमकेयर- योजनायाः भुगतानप्रक्रियां अधिकनियमितां कर्तुं कार्यं करोति, येन भविष्ये चिकित्सासंस्थासु वित्तीयमर्दनं न भवेत् तथा च रोगिणः समये गुणवत्तापूर्णां चिकित्सां प्राप्नुयुः।

# किशाऊ-परियोजनानन्तरं बी.बी.एम.बी. (BBMB) अवशिष्टराशिं (एरियर) प्राप्तुं सर्वकारस्य प्रचेष्टा तीव्रा, मुख्यमन्त्री केन्द्रीय-ऊर्जामन्त्रिणा साकं सम्भाषणं कृतवान्



हिमसंस्कृतवार्ताः — शिमला। किशाऊ-बन्धे महत्याः विजयस्य परं सुक्खू-सर्वकारेण बीबीएमबी-अवशिष्टराशिं (एरियर) प्रतिप्राप्तुं प्रचेष्टाः तीव्रीकृताः। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खू महोदयेन भाखड़ा-ब्यास-प्रबन्धन-बोर्ड (BBMB) इत्यस्मात् हिमाचलप्रदेशस्य लम्बितेभ्यः वित्तीय-अधिकारिभ्यः अवशिष्टराशेः च प्राप्त्यर्थं केन्द्रीय-ऊर्जामन्त्रिणा मनोहरलालखट्टरेण साकं दूरभाषमाध्यमेन विस्तरेण चर्चा कृता। मुख्यमन्त्रिणा केन्द्रसर्वकारं प्रति अस्मिन् प्रकरणे सक्रियसहयोगस्य आग्रहं कुर्वता कथितं यत् हिमाचलप्रदेशः सुदीर्घकालात् स्वकीयानां वैधानिकानाम् अधिकाराणां प्रतीक्षां करोति अधुना च राज्यसर्वकारः एतान् अधिकारान् सर्वथा सुनिश्चितं कर्तुं कटिबद्धः वर्तते।

## हरियाणा-सर्वकारेण सर्वोच्चन्यायालये शपथापत्रं दातव्यम् भवेत्

मुख्यमन्त्रिणा केन्द्रीयमन्त्रिणं प्रति ज्ञापितं यत् किशाऊ-बहुउद्देश्यीयपरियोजनायाम् हिमाचलप्रदेशः तदैव अग्रे सरिष्यति, यदा हरियाणासर्वकारः बीबीएमबी-सम्बद्धस्य स्वभागस्य अवशिष्टभुक्तेः विषये स्पष्टां सहमतिं प्रकटयिष्यति तथा च सर्वोच्चन्यायालये (सुप्रीम कोर्ट) अस्मिन् आशये शपथपत्रं (Affidavit) प्रदास्यति। तेन प्रोक्तं यत् हिमाचलप्रदेशस्य हितानाम् अवहेलनां कृत्वा राज्यात् कस्यापि नूतनप्रकल्पस्य उपरि सहयोगस्य अपेक्षा करणीया उचिता न भविष्यति। वारंवारं याचनां कृत्वापि पञ्जाब-हरियाणाराज्याभ्यां हिमाचलप्रदेशः स्वकीयाद् अधिकारात् वञ्चितः स्थापितः। मुख्यमन्त्र्युक्तौ केन्द्रीयमन्त्रिणा मनोहरलालखट्टरेण आश्वासनं दत्तं यत् सः अस्मिन् विषये हरियाणा-पञ्जाबयोः मुख्यमन्त्रिभ्यां साकं चर्चां विधास्यति तथा च हिमाचलप्रदेशस्य वैधानिक-अधिकाराणां संरक्षणाय समाधानाय च आवश्यकीं प्रचेष्टां करिष्यति।

## एकदशकात् अपि अधिककालात् वञ्चितः अस्ति हिमाचलप्रदेशः

मुख्यमन्त्रिणा कथितं यत् प्रायः १५ वर्षपूर्वं सर्वोच्चन्यायालयः स्वकीयेषु आदेशेषु स्पष्टरूपेण हिमाचलप्रदेशस्य भाखड़ा-ब्यास-प्रबन्धन-बोर्ड इत्यस्य परियोजनासु ताभ्यः प्राप्यमाणेषु लाभेषु च ७.१९ प्रतिशतं सहभागिताम् अधिकारं स्वीकृतवान्। एतदभावेऽपि हिमाचलप्रदेशः विगत-एकदशकात् अपि अधिककालात् स्वभागस्य १३,०६६ मिलियन-यूनिट् परिमितां विद्युत् तथा च तस्याः सम्बद्धानां वित्तीयलाभानां वञ्चितः अस्ति। तेन प्रतिपादितं यत् सर्वोच्चन्यायालयस्य निर्णयात् परम् अधुना राज्यसर्वकारः बीबीएमबी-संस्थायाः स्वभागस्य प्रायः ४,२०० कोटिरूप्यकाणां (4,200 करोड़ रुपए) अवशिष्टराशेः प्राप्त्यर्थं सर्वाणि आवश्यकानि वैधानिकानि प्रशासनिकानि च पदानि उत्थापयति। एषा राशिः हिमाचलप्रदेशस्य जनानां वैधानिकः अधिकारः अस्ति राज्यसर्वकारश्च एतत् प्राप्तुं पूर्णदृढ़तया प्रयतते।

## पूर्वतना सहमतिः मुख्यमन्त्रिणा अस्वीकृतम् आसीत्

४२२ मेगावाट् परिमितायाः किशाऊ-बन्धपरियोजनायाः उपरि वर्षे २०२३ मध्ये पुरातना सहमतिः मुख्यमन्त्रिणा ठाकुरसुखविन्द्रसिंहसुक्खू महोदयेन अस्वीकृतं विहितं, यस्य अन्तर्गतं हिमाचलस्य विद्युत्-उत्पादनव्ययस्य (लागत मूल्य) कश्चित् बृहद्भागः वहनीयः भवति स्म। परन्तु मुख्यमन्त्रिणः सुक्खू महोदयस्य दृढमनोभावात् परम् अधुना राज्यं किमपि धनं विना (बिना एक भी पैसा लगाए) वार्षिकं ६०० कोटिरूप्यकाणां राजस्वं प्राप्स्यति, यत् हिमाचलप्रदेशस्य अधिकाराणां महती विजयः अस्ति।

# अगस्तमासे भविष्यति विधानसभायाः मानसूनसत्रम्, मन्त्रिमण्डलस्य उपवेशने चर्चोत्तरं निश्चिष्यते कार्यसारणी

## विधानसभायाः उपाध्यक्षेण सह मुख्यसचेतकस्य पदं पूरयितुम् अपि चलति सज्जता




हिमसंस्कृतवार्ताः — शिमला । हिमाचलविधानसभायाः मानसूनसत्रम् अगस्तमासे भवितुं शक्नोति। एतदर्थं सज्जाः अपि आरब्धाः इति सूचना वर्तते। २० जुलाई दिनाङ्के प्रदेशमन्त्रिमण्डलस्य (कैबिनेट) उपवेशनं प्रस्तावितम् अस्ति। अतः मन्यते यत् मन्त्रिमण्डलोपवेशने अस्मिन् विषये चर्चोत्तरं मानसूनसत्रस्य घोषणा सम्भवा अस्ति। सम्प्रति सर्वेषां दृष्टयः प्रदेशमन्त्रिमण्डलस्य उपवेशने स्थिताः सन्ति। प्राप्तानुसारं नियमानुसारं विधानसभायाः वर्षे ३५ उपवेशनानि करणीयानि भवन्ति। अस्मिन् वर्षे हिमाचलविधानसभायाः बजटसत्रं द्वयोः चरणयोः अभवत् अस्मिन् अन्तरे च १६ उपवेशनानि आयोजितानि आसन्। विधानसभायाः इतिहासे एषः प्रथमः अवसरः आसीत्, यदा सत्रं द्वयोः चरणयोः आयोजितं विहितम्। अपरपक्षे, अधुना विधानसभायाः मानसूनसत्रं प्रति अपि सज्जताः आरब्धाः इति वार्ता अस्ति। संसूच्यते यत् २० जुलाई दिनाङ्के आयोज्यमाने प्रदेशमन्त्रिमण्डलस्य उपवेशने मानसूनसत्रं ध्यात्वा चर्चा भवितुं शक्नोति तदुपरान्तं च अस्य औपचारिकी घोषणा अपि सम्भवा अस्ति।

## एतद्वर्षे दीर्घं चलितुं शक्नोति मानसूनसत्रम्

चर्चा अस्ति यत् अस्मिन् वारे मानसूनसत्रं दीर्घकालं यावत् चलितुं शक्नोति। अस्य पृष्ठतः कारणं विधानसभायाः निर्धारितानाम् उपवेशनानां सङ्ख्यां पूरयितुं वर्तते। सर्वकारः इच्छति यत् सदने अधिकतः अधिकं सर्वकारीयं कार्यं सम्पादितं भवेत्। साकमेव विपक्षाय अपि विविधेषु जनहितानां प्रदेशस्य च विषयेषु चर्चायाः पर्याप्तः अवसरः प्राप्तुं शक्नोति। तत्रैव मुख्यमन्त्री प्रदेशमन्त्रिमण्डले परिवर्तनं (बदलाव) प्रति अपि सङ्केतान् दत्तवान् अस्ति। एतादृश्याम् स्थितौ एतदपि मन्यते यत् मानसूनसत्रस्य अवसरे एव रिक्तानि चलन्ति हिमाचलविधानसभायाः उपाध्यक्षस्य 'चीफ व्हिप' (मुख्यसचेतकस्य च पदानां पूरणप्रक्रिया अपि कारयिष्यते। अधुना सर्वेषां नयनानि २० जुलाई दिनाङ्के भवितव्यायाम् कैबिनेट-उपवेशने स्थितानि सन्ति, यस्मिन् मानसूनसत्रस्य अवधेः तिथीनां च अन्तिमा स्वीकृतिः मिलितुं सम्भावना अस्ति।

# मिथिलायाः दार्शनिकपरम्परायां योगस्य नूतनोपक्रमः: एल.एन.एम.यू. संस्थायां राष्ट्रिया सङ्गोष्ठी, ४२५ प्रतिभागिनः द्विशताधिकानि शोधपत्राणि च'

हिमसंस्कृतवार्ता विश्व मोहन झा, दरभंगा। विदुषां भूमिं मिथिलायाः समृद्धां दार्शनिकपरम्पराम् अग्रे सारयितुं ललितनारायणमिथिलाविश्वविद्यालयस्य दर्शनशास्त्र-विभागेन 'भारतीयदार्शनिकअनुसन्धानपरिषदः' (ICPR), शिक्षा-मन्त्रालयस्य (भारतसर्वकारः) च सहयोगेन "योगमाध्यमेन आरोग्यम् आनन्दश्चः भारतीयज्ञानपरम्परायाः अन्तर्निहिता प्रज्ञा" इति विषये एका राष्ट्रिया सङ्गोष्ठी आयोजिता।
सङ्गोष्ठ्याः अध्यक्षतां कुर्वाणः कुलपतिः प्रो. सञ्जयकुमारचौधरीवर्यः न्यगादीत् यत् योगः भारतीयज्ञानपरम्परायाः अमूल्यो निधिः अस्ति, यः तन-मन-आत्मनां मध्ये समन्वयम् उत्पादयति। तेन कथितं यत् योगः अस्मान् कर्म एव धर्मत्वेन स्वीकर्तुं शिक्षयति, विकसितभारत–२०४७ इति लक्ष्यप्राप्तौ च अस्य महती भूमिका वर्तते। सः विश्वविद्यालये एन्.एस्.एस्. (NSS) तथा च 'आर्ट ऑफ लिविंग' (Art of Living) इत्यनयोः संयुक्ततत्त्वावधाने पञ्चदिवसीयस्य योगशिविरस्य आयोजनार्थम् आदिदेश।
मुख्यवक्त्री प्रो. कुसुमकुमारी अवोचत् यत् मिथिला शताब्दिभ्यः दर्शन-तर्कशास्त्र-ज्ञानानां भूमिः अस्ति। योगः केवलं शारीरिकः अभ्यासः एव नास्ति, अपितु आत्मशुद्धेः, मनोनियन्त्रणस्य, मोक्षप्राप्तेश्च कृते भारतीयदर्शनस्य कश्चन जीवन्तः विज्ञानः अस्ति। विधायकः प्रो. विनयकुमारचौधरी योगं बिहारस्य गौरवशालिनीं परम्परां कथयन् अस्य व्यापकप्रसारे बलं दत्तवान्। 'आर्ट ऑफ लिविंग' इत्यस्य बिहारप्रभारी आनन्दप्रकाशरायः मानसिकस्वास्थ्याय सकारात्मकजीवनाय च योगस्य उपयोगितां प्राकाश्यत्। उभयविधमाध्यमेन ('हाइब्रिड'-विधानेन) आयोजितायाम् अस्यां राष्ट्रियसङ्गोष्ठ्याम् देशस्य विभिन्नेभ्यः




राज्येभ्यः ४२५ तः अधिकाः प्रतिभागिनः पञ्जीकरणं कारितवन्तः, तथा च चतुर्षु समानान्तर-प्राविधिक-सत्रेषु (तकनीकी सत्रेषु) द्विशताधिकानां (२००+) शोधपत्राणां प्रस्तुतीकरणं सञ्जातम्। कार्यक्रमे स्मारिकायाः अपि विमोचनम् अभवत्। सङ्गोष्ठ्याः सञ्चालनं डॉ. प्रियङ्कराया कृतवती, धन्यवादज्ञापनं च डॉ. आर.एन. चौरसिया महोदयाः व्यधुः।

# श्रीहरिप्रियागुरुकुले पर्यावरणं प्रावृड्विज्ञानञ्चाधिकृत्य शास्त्रीयपरिचर्चाया आयोजनम्





**हिमसंस्कृतवार्ताः- वत्सदेशराजशर्मा, नवदेहली।** देहलीसर्वकारीय- कला- संस्कृति- भाषाविभागाधीनेन स्वायत्तसङ्घटनेन डॉ. गोस्वामी- गिरिधारिलालशास्त्री- प्राच्यविद्याप्रतिष्ठानेन अद्य ०४ जुलाई शनिवासरे श्रीमन्नारायणपीठ- श्रीहरिप्रियाश्रम- सम्बद्धे श्रीहरिप्रिया- वैदिक- गुरुकुले (शीदीपुरा, करोलबाग, नवदेहली) एका भव्या ज्ञानवर्धिका च शास्त्रीयपरिचर्चा आयोजिता। अस्याः सङ्गोष्ठ्याः मुख्यविषयः "महाकवि- कालिदासग्रन्थेषु पर्यावरणं प्रावृड्- विज्ञानं च" इत्यासीत्। अत्र रामानुजसम्प्रदायस्य पावनादर्शैः विशिष्टाद्वैतदर्शनस्य च प्रकाशे देशस्य मूर्धन्यविद्वद्भिः कालिदाससाहित्योक्त- प्रावृड्विज्ञानमधिकृत्य गम्भीरं चिन्तनं प्रस्तुतम्। राष्ट्रवन्दनं वैदिकमङ्गलाचरणञ्च कार्यक्रमस्य शुभारम्भः राष्ट्रभक्तिपरिपूरितस्य 'वन्दे मातरम्' इति गीतस्य सामूहिकगायनेन सञ्जातः, यत्र सर्वैः समुपस्थितैः उत्थाय राष्ट्राय प्रणतिः पुरःकृता। ततश्च मुख्यातिथिभिः दीपप्रज्वालनं सम्पादितम्। गुरुकुलस्य वेदाभ्यासिभिः वटुभिः व्याकरणसम्मतं सस्वरं वैदिकमङ्गलाचरणं स्वस्तिवाचनञ्च प्रस्तुत्य समग्रं वातावरणं सात्त्विकोजसा आपूरितम्। स्वागतभाषणानन्तरम् उपस्थितानां सन्त-मनीषिणां पुष्पमाल्यैः अङ्गवस्त्रैश्च सोल्लासमभिनन्दनं विहितम्। गुरुकुलछात्रैः मोहनशर्म-पुष्पम-महोदयैः सुमधुरसंस्कृतभाषया स्वागतगीतं गीतम्, तदनु प्रतिष्ठाननिदेशकरचितस्य दिव्यप्रेरणागीतस्य सामूहिकगायनं सम्पन्नम्।

## विदुषां सारगर्भितमुद्बोधनम्

आशुकविः डॉ. जीतरामभट्टः (निदेशकः, प्रतिष्ठानम्) महोदयैः स्वोद्बोधने कालिदास- साहित्योक्त- पर्यावरणसूत्राणां गम्भीरं निष्कर्षं प्रस्तुतम्। तैः प्रतिपादितं यत् सनातनसंस्कृतौ प्रकृतेः कणे-कणे साक्षान्नारायणस्य वासः विद्यते। कालिदासस्य साहित्यरचनाः वैश्विकपर्यावरण- सन्तुलनार्थमकाट्यं वैज्ञानिकप्रमाणम् अस्ति।

डॉ. स्वामी- मधुरकवि- आचार्य- सुरभारती- सेवकजी- महाराजः (अधिष्ठाता, गुरुकुलम्): रामानुजसम्प्रदायस्य शीर्षस्थविद्वद्भिः श्रीमहाराजैः पर्यावरणविज्ञानं मानसून् (प्रावृड्) विषयञ्चाधिकृत्य विशिष्टं व्याख्यानं प्रदत्तम्। तैः स्पष्टीकृतं यत् विशिष्टाद्वैतदर्शनानुसारम् अचित् (प्रकृतिः) ब्रह्मण एव शरीरम्, अतः प्रकृतेः रक्षणं साक्षाद् भगवत्कैङ्कर्यमेव (ईश्वरसेवा)। कालिदासस्य 'मेघदूतम्' आधुनिकर्तुविज्ञानस्य मूलस्रोतो विद्यते।श्रीदण्डपाण्याचार्यैः (प्राचार्यः, गुरुकुलम्) महोदयैः न केवलं कुशलतया मञ्चसञ्चालनं कृतम्, अपि तु विषयप्रवर्तनं कुर्वद्भिः स्वकीया सशक्तवैचारिकदृष्टिरपि उपस्थापिता, यया सर्वे छात्राः सुधियश्च भृशं लाभान्विताः। विशिष्टमहानुभावानां गरिमामयी उपस्थितिः

अस्मिन् पावने बौद्धिकसत्रे आचार्य- सूर्यप्रकाश- नौटियालः, अजयकुमार डागा, शेखर झा, आचार्य- त्रिभुवनाग्निहोत्री, स्वामी-रामकृष्णदास-गौतमः, पवनः, अमितः, अनिलः, पण्डित उमेशः इत्यादिभिः सह अनेके सनातनिजनाः, शोधार्थिनः भक्ताश्च उपस्थिताः आसन्।

### वैदिकशान्तिपाठः, लेखनसामग्री- प्रसादवितरणञ्च-

ज्ञानामृतवर्षिण्या अस्याः परिचर्चायाः उत्तरार्धे सर्वैः वक्तृभिः एतत् दृढतया प्रतिपादितं यत् भूमण्डलीयतापनम् इत्याख्यायाः वैश्विक- विभीषिकायाः स्थायी समाधानं सनातने वाङ्मये महाकविकालिदासस्य ऋतुवैज्ञानिकदृष्टौ च सन्निहितमस्ति। कार्यक्रमस्य समापने चराचरकल्याणार्थं वैदिकशान्तिपाठः, छात्रेभ्यश्च लेखनसामग्रीणां (अभ्यासपुस्तिका- लेखनी- इत्यादीनां) वितरणं सम्पन्नम्। तदनन्तरं साम्प्रदायिकपरम्परया सर्वेभ्यः भक्तेभ्यः अतिथिभ्यश्च सेवाभावेन भगवत्प्रसादस्य वितरणं कृतम्। नमो नमः।

# लौकिकन्यायकोशः

## काशकुशावलम्बनन्यायः

जले प्लवनसमये निमज्जनभीत्या मनुष्यः कोऽपि आधारः लभ्यते वेति आतुरो भवति। सः आधारः काशकुशसदृशः लघुरूपो वा भवतु तस्य आधारेण प्रवाहात् बहिः आगन्तुं सः मनुष्यः प्रयत्नं करोति।

अल्पस्यापि साहाय्येन महत् कार्यं सम्पादयितुं क्रियमाणं निष्फलं प्रयासं द्योतयति अयं न्यायः। पश्यन्तु-

१. सर्वदर्शनसंग्रहे आर्हतदर्शने २१ पृष्ठे,
२. नैष्कर्म्यसिद्धौ १- ७६,
३. तन्त्रवार्तिके- १-३-८।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे, महाराष्ट्रम्**



# वार्ता-संवादः

**हिमसंस्कृतवार्ताः, ईदधीरजः,हैदराबादः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतम् व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य मया एका विचित्रा वार्ता श्रुता अस्ति। पोलदेशे कयाचित् शकट-निर्माणशालया सौरक्षेत्रे तृण-कर्तन-यन्त्राणाम् स्थाने शत-सङ्ख्याकाः मेषाः नियोजिताः सन्ति। मेषैः सौर-पट्टिकानाम् अधः तृणानि भक्षितानि।

नन्दिनी- सत्यम्, मेषैः पर्यावरणस्य रक्षा कृता अस्ति, तत् अतीव रोचकम्। देहली-नगरे अपि एकेन चालकेन विचित्रा चौरक्रीडा कृता। तेन पञ्च-लक्ष- रूप्यकाणां चौर्यस्य मिथ्यावार्ता आरक्षिभ्यः दत्ता। पश्चात् आरक्षिभिः तत् धनं तस्यैव शकटस्य यन्त्रपिधानस्य अधः गुप्तं प्राप्तम्। चालकेन स्वस्य ऋण-नाशाय एषः कपटः रचितः।

**काव्या-** अहो, धनस्य लोभात् केचन मनुष्याः कीदृशम् कपटम् कुर्वन्ति। धनस्य विषये एव चीनदेशे अपि एका वार्ता प्रसृता अस्ति। तत्र एकेन एकोनविंशति-वर्षीयेन छात्रेण स्वस्य मरणोत्तर- इच्छापत्रं लिखितम्। तेन मातापितरौ विहाय स्वस्य सर्वं धनं प्रियमित्राय दत्तम्। सः छात्रः स्वस्य जनकयोः पुनर्विवाहेन दुःखितः जातः।

**नन्दिनी-** सत्यम्, कौटुम्बिक-कलहेन मित्राणि एव बन्धवः भवन्ति। इदानीं गगनस्य वार्ता अस्ति। अमेरिकादेशस्य कश्चित् पूर्व-अन्वेषकः अवादीत् यत् चन्द्रस्य पृष्ठे कतिचन दीर्घ-चतुरस्र-शिलाः सन्ति। तासां चित्राणि आरक्षितस्थाने स्थापितानि सन्ति। परन्तु गगन-अन्वेषण-संस्थया एषा वार्ता सर्वथा मिथ्या इति उद्घोषिता अस्ति।

**काव्या-** अहो, चन्द्रे अपि शिलानां चर्चा रोमाञ्चकरी अस्ति। अद्यतनः कार्यक्रमः अत्रैव समाप्तः जातः।

# संस्कृतस्याङ्कीकरणस्य आवश्यकता

**अग्निज उपमन्युः, हिंदू महाविद्यालयः,दिल्ली विश्वविद्यालयः**

संस्कृतं विश्वस्य प्राचीनतमा समृद्धतरा च परम्परा अस्ति। एतस्य कारणेन संस्कृतं वैज्ञानिकानुशासनभाषायाः संज्ञां प्राप्तवत्। अस्य व्याकरणं पूर्णतया वैज्ञानिकम् अस्ति। संस्कृतस्य ध्वनयात्मकता वैज्ञानिकभाषारूपेण तस्य उपयोगितां वर्धयति। संस्कृते विज्ञानम् अपि अतिप्राचीनकाले उपस्थितम् आसीत्। चरकसंहिता, सुश्रुतसंहिता च एतस्य तथ्यस्य प्रत्यक्षं प्रमाणं स्तः।

अद्य अङ्कीययुगम् अस्ति। अद्य विश्वस्य बह्वीषु भाषासु पर्याप्तम् अङ्कीकरणं भवति, परन्तु संस्कृतस्य अङ्कीकरणं पर्याप्तं न भवति। संस्कृतेन इदानीं महती चिन्ता अस्ति। अस्य कारणं जनानां संस्कृतं प्रति अज्ञानमपि अस्ति। परन्तु केचन जनाः संस्कृतस्य अङ्कीकरणक्षेत्रे प्रभावी प्रयासं कुर्वन्ति। उदाहरणार्थं गेरार्ड महोदयः। गेरार्ड इत्येषः संस्कृतस्य 'हेरिटेज इंजन' इत्यस्य निर्माता अस्ति। इदानीं ईंजनम् अष्टाध्यायी-आधारितम् अस्ति। अद्य संस्कृतव्याकरणस्य बहूनि प्रतिरूपकाणि (Models) विकसितानि सन्ति। वयं संस्कृतस्य अङ्कीकरणाय प्रतिबद्धाः स्मः। अस्मिन् दिशि केचन जनाः प्रभावी प्रयासं कुर्वन्ति, परन्तु संस्कृतस्य अङ्कीकरणं दीर्घकालिकी तपस्या अस्ति। अतः अस्मिन् क्षेत्रे नूतनस्य प्रतिरूपकस्य आवश्यकता अस्ति। वयं प्रतिबद्धाः स्मः यत् एकस्मिन् दिवसे संस्कृतभाषया युक्तं सङ्गणकम् अपि उपस्थितं भविष्यति। वयं विश्वासं कुर्मः यत् वयं स्वीयं लक्ष्यं सफलं करिष्यामः।

# सुरक्षापरिषदः अस्थायीसदस्यतायै भारतस्य आधिकारिक-अभियानस्य शुभारम्भः

भारतम् २०२८-२९ (द्विसहस्राष्टाविंशति-एकोनत्रिंशत्) कार्यकालाय संयुक्तराष्ट्रसुरक्षापरिषदः अस्थायीसदस्यरूपेण निर्वाचनाय आधिकारिकरूपेण स्वकीयम् अभियानम् आरब्धवान्।विदेशमन्त्री डॉ. सुब्रह्मण्यम् जयशंकरः ह्यः रात्रौ न्यूयार्कनगरे संयुक्तराष्ट्रमुख्यालये वैश्विकशान्तिं, सुरक्षां, विकासं च प्रवर्धयितुं भारतस्य शान्तिदृष्टिकोणं प्रस्तुतवान्। सः अवदत् यत् वैश्विकसङ्घर्षाणाम् अस्थिरतायाः च मध्ये संयुक्तराष्ट्रस्य भूमिका पूर्वस्मात् अपि अधिका महत्त्वपूर्णा सञ्जाता अस्ति। डॉ. जयशंकरः अकथयत् यत् भारतेन संयुक्तराष्ट्रस्य प्रायः पञ्चाशत् (५०) शान्त्यभियानेषु प्रायः लक्षत्रयमिताः (३,००,०००) सुरक्षाकर्मिणः योगदानरूपेण प्रेषिताः, वर्तमानकाले च दशलक्षेषु (१०) संयुक्तराष्ट्रशान्त्यभियानेषु त्रिचत्वारिंशच्छताधिक-चतुःसहस्रतः (४,३००+) अधिकाः सुरक्षाकर्मिणः कार्यरताः सन्ति। सः अवदत् यत् भारतं निरन्तरं संवादस्य कूटनीत्याः च समर्थनम् अकरोत्, विकासशीलदेशानां समस्याः च प्रमुखतया उत्थापितवान्।डॉ. जयशंकरः सदस्यदेशान् भारतस्य अभ्यर्थितायाः समर्थनं कर्तुं समाहूतवान्। सः अवदत् यत् सुरक्षापरिषदो भारतस्य उपस्थितिः अस्मिन् महत्त्वपूर्णे निकाये निर्णयप्रक्रियां नवीनां शक्तिं प्रदास्यति (सशक्तां करिष्यति)। भारतम् इतःपूर्वं सुरक्षापरिषदः गैर-स्थायीसदस्यरूपेण अष्टवारं कार्यकालं पूरितवान् अस्ति।

# 'बिहारराज्यस्य कृषकेभ्यः प्राप्स्यते आधुनिक-विपण-तन्त्रम्, वर्धिष्यते मूल्य-संवर्धनं प्रसंस्करणं च'

- '₹१२८८ कोटि-परिमित-योजनाभिः परिवर्तितानि भविष्यन्ति कृषि-विपणानि, कृषकाणाम् आय-वृद्धये एषः कश्चन महत्त्वपूर्णः प्रयासः'
- 'कृषि-उपज-विपण-प्राङ्गणानाम् आधुनिकीकरणेन कृषकाः प्राप्स्यन्ति उत्कृष्टं विपणम्, उचितं मूल्यं तथा च आधुनिकीः सुविधाः'विजय कुमार सिन्हा

**राघव नाथ झा पटना।** माननीयः कृषि मन्त्री श्रीविजयकुमारसिंहवर्यः न्यगादीत् यत् राज्यसर्वकारः कृषकेभ्यः तेषाम् कृषि-उत्पादानाम् उचितं मूल्यं प्रदातुम् तथा च कृषि-विपण-व्यवस्थां सुदृढां विधातुं कृषि-रोड-मैप (२०२३-२८) इत्यस्य अन्तर्गतं कृषि-उपज-विपण-प्राङ्गणानाम् आधुनिकीकरणे समुचित-विकासे च विशेषं बलं ददाति। एतदन्तर्गतं कृषि-उत्पादानां विपणन-सम्बद्धाः सर्वाः अपि गतिविधयः आधिक्येन सुविज्ञेयाः, पारदर्शिन्यः, कृषक-हितैषिण्यश्च विधीयन्ते।

तेन कथितं यत् राज्यस्य २२ विपण-प्राङ्गणानां जीर्णोद्धारस्य, आधुनिकीकरणस्य, समुचित-विकासस्य च योजनाः प्रायः १२८८.६६ कोटि-रूप्यकाणां व्ययेन क्रियान्वियन्ते। एतेषु अष्टौ (०८) विपण-प्राङ्गणानां कार्याणि पूर्णाणि सञ्जातानि, अवशिष्टेषु च प्राङ्गणेषु निर्माण-विकास-कार्याणि तीव्रगत्या प्रचलन्ति। एतासां योजनानाम् उद्देश्यं कृषकेभ्यः वैज्ञानिक-भण्डारणम्, आधुनिक-विपणनम्, मूल्य-संवर्धनम्, प्रसंस्करणम् तथा च सुगम-परिवहन-सुविधाः प्रदातुम् अस्ति।

माननीयः मन्त्री श्रीसिंहः अवोचत् यत् दीर्घकालात् उपेक्षितानि कृषि-विपणानि पुनरुज्जीव्य तानि आधुनिक-कृषि-व्यापार-केन्द्ररूपेण विकस्यन्ते। एतेषु विपणेषु आधुनिकाः भण्डारगृहाः (गोदाम), प्रशासकीय-भवनानि, कृषक-विश्राम-गृहाणि, शौचालयाः, पेयजलाञ्जलिः, वाहन-विश्राम-स्थलानि (पार्किंग), आन्तरिक-मार्गाः, वैद्युतिक-तौल-प्रणाली, प्रकाश-व्यवस्था तथा च अन्याः आवश्यकाः आधारभूत-संरचनाः निर्मीयन्ते। अनेन कृषकाणाम् उपज-विक्रये सौकर्यं भविष्यति तथा च कृषि-उत्पादानां विपणन-व्ययः न्यूनीभविष्यति।

तेन संसूचितं यत् राज्यस्य द्वादश (१२) विपण-प्राङ्गणानाम् आधुनिकीकरणाय समुचित-विकासाय च 'नाबार्ड' (NABARD) इति संस्थायाः साहाय्येन सञ्चालित-योजनान्तर्गतं वर्षे २०२६-२७ तमे प्रायः ४६.०३ कोटि-रूप्यकाणां राशिः व्ययार्थं स्वीकृता अस्ति। एवमेव राज्यस्य अन्यासां नव (९) विपण-प्राङ्गणानां विकासाय आधुनिकीकरणाय च वित्तीयवर्षे २०२६-२७ तमे प्रायः ५९.२३ कोटि-रूप्यकाणां राशिः स्वीकृता। एतासां योजनानां माध्यमेन विपण-अवसंरचनायै आधुनिकं स्वरूपं प्रदास्यते तथा च कृषकाणां कृते श्रेष्ठं विपणन-वातावरणं सज्जीकरिष्यते। माननीयः मन्त्री प्रत्यपादयत् यत् विपण-प्राङ्गणानां विकासस्य मुख्यमुद्देश्यं कृषकेभ्यः उचितं लाभप्रदं च मूल्यं प्रदापनम्, कृषि-उत्पादानां भण्डारण-प्रसंस्करण-वेष्टन-(पैकेजिङ्ग)-मूल्यसंवर्धनानां सुविधां उपलब्धीकरणम् तथा च मध्यस्थानां भूमिकां न्यूनीकृत्य कृषकान् साक्षात् विपणेन सह संयोजयितुम् अस्ति। अनेन कृषकाणाम् आय-वृद्ध्या सहैव कृषि-उत्पादानां गुणवत्तायां विपण-प्राप्तौ च सुधारः भविष्यति। तेन निगदितं यत् राज्यसर्वकारः कृषकाणाम् आयं द्विगुणीकर्तुं, कृषिं लाभप्रदं विधातुं तथा च ग्रामीण-अर्थव्यवस्थां सशक्तं कर्तुं बहुआयामीन् प्रयासान् करोति। कृषि-विपणानाम् आधुनिकीकरणम् अस्मिन्नेव मार्गे एकं महत्त्वपूर्णं पदमस्ति। आधुनिक-विपण-प्राङ्गणानां विकासेन कृषि-उत्पादानां सङ्ग्रह-श्रेणीकरण-(ग्रेडिंग)-वेष्टन-विपणनानां सुविधाः सुतरां वरीयांसः भविष्यन्ति। अनेन राज्यस्य कृषि-उत्पादानां प्रतिस्पर्धात्मिका क्षमता अपि वर्धिष्यते।

माननीयः मन्त्री उक्तवान् यत् बिहारस्य कृषि-उत्पादानां देश-विदेशयोः विपणेषु अभ्यर्थना (माँग) निरन्तरं वर्धते। मखाना, मक्का, फलानि, शाकानि, धान्यम्, गोधूमः तथा च अन्येषां कृषि-उत्पादानां उत्तम-विपणनाय आधुनिक-अवसंरचनायाः आवश्यकता दीर्घकालात् अनुभूयते स्म। वर्तमान-सर्वकारः अस्यां दिशि दृढानि पदानि स्थापयति, येन कृषकाः स्वकीयायाः उपजायाः अधिकतमं लाभं प्राप्तुं शक्नुयुः।सः अवोचत् यत् आधुनिकाः विपण-प्राङ्गणाः कृषि-क्षेत्रे निवेशं प्रोत्साहयिष्यन्ति, रोजगारस्य नूतनान् अवसरान् सृक्ष्यन्ति तथा च ग्रामीण-क्षेत्रेषु आर्थिक-गतिविधीन् गतिं प्रदास्यन्ति। एतासां परियोजनानां पूर्णतायाः परं कृषि-विपणानि केवलं क्रय-विक्रयस्य केन्द्राणि न स्थास्यन्ति, अपितु कृषि-व्यापारस्य, मूल्य-संवर्धनस्य, ग्रामीण-विकासस्य च प्रमुखाणि केन्द्राणि भविष्यन्ति।कृषि-मन्त्रिणा अधिकारिणः निर्दिष्टाः यत् सर्वाणि निर्माण-कार्याणि निर्धारिते गुणवत्ता-मानके अनुकूलं तथा च समय-सीमायाः अन्तः पूर्णानि भवेयुः। तेन कथितं यत् विकास-कार्याणां नियमितं समीक्षणं क्रियते, कस्मिंश्चित् अपि स्तरे शिथिलता न सोढव्या। कृषकाणां हितं सर्वोपरि अस्ति, सर्वकारश्च एतत् सुनिश्चितं करिष्यति यत् योजनानां लाभः साक्षात् कृषकान् यावत् प्राप्नुयात्। कृषि-विपणानाम् आधुनिकीकरणेन राज्ये कृषि-व्यापारः नूतनं परिचयं (पहचानं) प्राप्स्यति, कृषकाणाम् आर्थिक-स्थितिः च सुदृढतरा भविष्यति। आगामिषु वर्षेषु बिहारस्य विपण-प्राङ्गणाः आधुनिक-कृषि-विपणन-प्रतिमान (मॉडल) रूपेण स्थापिताः भविष्यन्ति, राज्यस्य कृषि-विकासे च महतीं भूमिकाम् ऊहिष्यन्ति।

# 'हरितक्षेत्र-उपग्रह-नगर-निर्माणाय 'सी.ई.पी.टी.' संस्थायाः विशेषज्ञता-सहयोगः प्राप्स्यते उत्कृष्टं नगरम्, उज्ज्वलं भविष्यत्" नीतीश मिश्रः

**हिमसंस्कृतवार्ता राघव नाथ झा।** नगर-विकास-एवं-आवास-विभागस्य मन्त्री श्रीनीतीशमिश्रवर्यः न्यगादीत् यत् राज्ये हरितक्षेत्र-उपग्रह-नगराणाम् (Greenfield Satellite Townships) सुनियोजित-विकासार्थं विभिन्न-परियोजनानां च प्रभावशालि-कार्यान्वयनार्थम् एकः महत्त्वपूर्णः निर्णयः गृहीतः। राज्यशासनेन 'सेंटर फॉर एनवायरनमेंटल प्लानिंग एंड टेक्नोलॉजी' (सी.ई.पी.टी.) परामर्शात्मक-प्रतिष्ठानम्, सी.ई.पी.टी. विश्वविद्यालयः, अहमदाबादः तकनीकी-सहायता-इकाई (प्राविधिक-सहयोग-प्रकोष्ठः) रूपेण चयनितः अस्ति।




श्रीशमिश्रः अवोचत् यत् माननीय-मुख्यमन्त्रिणः श्रीसम्राटचौधरीमहोदयस्य कुशलनेतृत्वे राज्यसर्वकारः तादृशान् आधुनिक-शहरीकरण-केन्द्रान् विकसितुं कटिबद्धः अस्ति, ये सुदृढ-आधारभूत-संरचनाम्, सुनियोजित-आवासान्, गुणवत्तापूर्ण-नागरिक-सुविधाः तथा च आर्थिक-गतिविधीनां नूतनावसरान् प्रदद्युः। एतदर्थमेव सी.ई.पी.टी. विश्वविद्यालय-सदृश्याः राष्ट्रियस्तरस्य विशेषज्ञ-संस्थायाः सहयोगः गृह्यते।

मन्त्री श्रीनीतीशमिश्रः प्रत्यपादयत् यत् सी.ई.पी.टी. देशस्य अग्रणीषु संस्थासु अन्यतमा अस्ति, या शहरी-नियोजन-क्षेत्रे, आधारभूत-संरचना-विकास-क्षेत्रे तथा च शाश्वत-शहरीकरण-क्षेत्रे व्यापकम् अनुभवं धारयति। अस्याः सहयोगेन राज्ये प्रस्तावितानां हरितक्षेत्र-उपग्रह-नगर-परियोजनानां योजना-निर्माणम्, रणनीतिक-मार्गदर्शनम्, प्राविधिक-परामर्शः तथा च गुणवत्तापूर्ण-कार्यान्वयनं सुनिश्चितं भविष्यति।



हिमसंस्कृतवार्ता
असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

## संस्कृतं मधुरं सदा- ५६ (व्याकरणचिन्तनम्)

अस्मिन् लेखे संस्कृतान्तर्गतः सङ्ख्या-सम्बद्धविषयो यथाशक्ति चर्च्यते। सङ्ख्याशब्दाः गणनार्थकाः, विशेषणत्वेन युज्यन्ते। एकतः आरभ्य चत्वारि यावत्, एतेषां त्रिषु लिङ्गेषु विविधरूपाणि भवन्ति, परन्तु पञ्चतः आरभ्यः शतं यावत् एतेषां त्रिषु लिङ्गेषु समानरूपाणि भवन्ति। एकतः चत्वारि पर्यन्तं यथा-

१) एकः सिंहः अस्ति। एका धेनुः अस्ति। एकं पुष्पम् अस्ति। एकशब्दः नित्य-एकवचनात्मकः।
अस्य विभक्तिरूपाणि, यथा-
पुंसि- एकः/ एकम्/ एकेन/ एकस्मै/ एकस्मात्/ एकस्य/ एकस्मिन् चेति।
स्त्रियाम्- एका/ एकाम्/ एकया/ एकस्यै/ एकस्याः/ एकस्याः/ एकस्याम्।
नपुंसके- एकम्/ एकम्/ अन्यरूपाणि पुँल्लिङ्गवत्।

२) एवमेव, द्विशब्दः नित्यद्विवचनयुक्तः भवति। अस्य वाक्योदाहरणानि त्रिषु लिङ्गेषु, यथा-
द्वौ बालकौ पठतः। द्वे बालिके पठतः। द्वे फले स्तः।
द्विशब्दस्य विभक्तिरूपाणि-
पुंसि- द्वौ/ द्वौ/ द्वाभ्याम्/ द्वाभ्याम्/ द्वाभ्याम्/ द्वयोः/ द्वयोः।
स्त्रियाम्- द्वे/ द्वे/ अन्यानि पुँल्लिङ्गवत्।
नपुंसके- सर्वरूपाणि स्त्रीलिङ्गवदेव।

३) तथैव, त्रिशब्दस्य वाक्योदाहरणानि- त्रयः युवकाः क्रीडन्ति। तिस्रः युवतयः क्रीडन्ति। त्रीणि फलानि सन्ति।
त्रिशब्दः नित्यबहुवचनान्तः। एतस्य त्रिषु लिङ्गेषु रूपाणि एवं स्युः-
पुंसि- त्रयः/ त्रीन्/ त्रिभिः/ त्रिभ्यः/ त्रिभ्यः/ त्रयाणां/ त्रिषु।
स्त्रियाम्- तिस्रः/ तिस्रः/ तिसृभिः/ तिसृभ्यः/ तिसृभ्यः/ तिसृणां/ तिसृषु।
नपुंसके- त्रीणि/ त्रीणि/ शेषं पुँल्लिङ्गवत्।

४) चतुर्-शब्दोऽपि नित्यबहुवचनान्तः एव। वाक्योदाहरणानि-
यथा- चत्वारः अतिथयः आगच्छन्ति।
चतस्रः बालिकाः गृहे सन्ति।
चत्वारि यानानि गच्छन्ति।
एतेषां विभक्तिरूपाणि एवं भवन्ति-
पुंसि- चत्वारः/ चतुरः/ चतुर्भिः/ चतुर्भ्यः/ चतुर्भ्यः/ चतुर्णां/ चतुर्षु।
स्त्रियाम्- चतस्रः/ चतस्रः/ चतसृभिः/ चतसृभ्यः/ चतसृभ्यः/ चतसृणाम्/ चतसृषु चेति।
नपुंसके- चत्वारि/ चत्वारि शेषं पुँल्लिङ्गवत्।

एते चतुर्विधाः सङ्ख्याः लिङ्गत्वात् किञ्चित् क्लेशप्रदाः सन्ति, चेदपि पञ्चप्रभृतिसङ्ख्यानां व्यवहारे सौकर्यम् अनुभूयते इति। (क्रमशः)